"प्रस्रविष्यन्ति तोयानि विमलानि महीधराः ।
विदर्शयन्तो विविधान् भूयश्छिन्नांश्च निर्झ-
रान् ॥")

चारुः । इति च शब्दरत्नावली ॥ (यथा, माघे । ६ । १३ ।

"रुचिधाम्नि भर्त्तरि भृशं विमलाः
परलोकमभ्युपगते विविशुः ॥")

विमलः, पुं, (विगतो मलः पापं यस्मात् ।) अर्हन् । इति हेमचन्द्रः ॥ ( सुद्युम्नपुत्रः । यथा, भागवते । ९ । १ । ४१ ।

"तस्योत्कलो गयो राजन् विमलश्च त्रयः सुताः ॥")

विमलदानं, क्ली, (विमलं विशुद्धं दानम् ।) नित्यनैमित्तिककाम्यदानम् । ईश्वरप्रीणनार्थदानञ्च । यथा,—

"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ।
अहन्यहनि यत्किञ्चिद्दीयतेऽनुपकारिणे ।
अनुद्दिश्य फलं तत् स्यात् ब्राह्मणाय तु नित्य-
कम् ॥
यत्तु पापप्रशान्त्यै च दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
अपत्यविजयैश्वर्य्यस्वर्गार्थं यत् प्रदीयते ।
दानं तत् काम्यमाख्यातमृषिभिर्धर्म्मचिन्तकैः ॥
चेतसा सत्त्वयुक्तेन दानं तद्विमलं स्मृतम् ।"
इति गारुडे ५१ अध्यायः ॥

विमलमणिः, पुं, ( विमलः स्वच्छो मणिः । ) स्फटिकः । इति राजनिर्घण्टः ॥

विमला, स्त्री, ( विमल+टाप् । ) सप्तला । इत्यमरः ॥ चामरकषा इति भाषा ॥ ( अस्याः पर्य्यायो यथा,—

"शातला सप्तला सारा विमला विदुला च सा ।
तथा निगदिता भूरिफेना चर्म्मकषेत्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

भूमिभेदः । इति मेदिनी । ले, १३१ ॥ देवीभेदः । यथा,—

"यूथाख्यविमला कार्य्या शुद्धहारेन्दुवर्च्चसा ।
मुक्ताघसूत्रधारी च कमण्डलुकरा वरा ॥
नावासनसमारूढा श्वेतमाल्याम्बरप्रिया ।
दधिक्षीरोदनाहारा कर्पूरमदचर्च्चिता ।
तिलपङ्कजहोमेन राष्ट्रायुर्नृपवर्द्धिनी ॥"

इति देवीपुराणे संवत्सरदेवताद्वितीयविंशतिकाविधिः ॥ * ॥ अन्यच्च ।

"पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम् ।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता ॥"
इति कालिकापुराणे ८२ अध्यायः ॥ * ॥

अपरञ्च ।

"उत्कले नाभिदेशश्च विरजाक्षेत्र उच्यते ।
विमला सा महादेवी जगन्नाथस्तु भैरवः ॥"
इति तन्त्रचूडामणौ ५१ पीठनिर्णयः ॥

( यथा च देवीभागवते । ७ । ३० । ६४ ।

"गयायां मङ्गला प्रोक्ता विमला पुरुषोत्तमे ॥")

विमलात्मकः, त्रि, (विमलो निर्म्मल आत्मा यस्य ।) निर्म्मलः । इत्यमरटीकायां रायमुकुटः ॥

विमलाद्रिः, पुं, ( विमलः अद्रिः । ) शत्रुञ्जयपर्व्वतः । इति हेमचन्द्रः ॥

विमलार्थकः, त्रि, निर्म्मलः । इत्यमरटीकायां रायमुकुटः ॥

विमांसं, क्ली, ( विरुद्धं मांसम् । ) अशुद्धमांसम् । तत्तु कुक्कुरादिमांसम् । इति केचित् ॥

विमाता, [ऋ] स्त्री, ( विरुद्धा माता । ) मातृसपत्नी । सतमा इति भाषा । सा कनीयस्यपि नमस्या । यथा, स्मृतिः ।

"मातुः पितुः कनीयांसं न नमेद् वयसाधिकः ।
नमस्कुर्य्यात् गुरोः पत्नीं भ्रातृजायां विमा-
तरम् ॥"

स्मृत्यर्थसारे ।

"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः ॥"

यतः पत्युर्व्वयसा तास्त्रियो वृद्धा अतः कनिष्ठा अपि नमस्याः । इति मलमासतत्त्वम् ॥ * ॥ विमातृरजोनिवृत्तावपि पितामहधनविभागकर्त्तव्यत्वम् । यथा बृहस्पतिः ।

"पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः ।
मातुर्निवृत्ते रजसि जीवतोरपि शस्यते ॥"

अत्र मातृपदं विमातृपरमपि पुत्त्रान्तरोत्पत्तिसम्भावनातौल्यात् । इति दायतत्त्वम् ॥ * ॥ अस्या अनंशित्वं यथा । सोदरभ्रातृभिर्विभागे क्रियमाणे मात्रे पुत्त्रसमांशो दातव्यः । समांशहारिणी माता इति वचनान्मातृपदस्य जननीपरत्वात् न सपत्नीमातृपरत्वमपि । सकृच्छ्रुतस्य मुख्यगौणत्वानुपपत्तेः । इति दायभागः ॥

विमातृजः, पुं, ( विमातुर्जायते इति । विमातृ+जन+डः । ) मातृसपत्नीपुत्त्रः । तत्पर्य्यायः । वैमात्रेयः २ । इत्यमरः ॥ वैमात्रः ३ । इति जटाधरः ॥

विमानः, पुं क्ली, ( विगतं मानमुपमा यस्य । ) देवरथः । तत्पर्य्यायः । व्योमयानम् २ । इत्यमरः ॥ ( यथा, कुमारसम्भवे । २ । ४५ ।

"भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते ।
खिलीभूते विमानानां तदापातभयात् पथि ॥")

सार्व्वभौमगृहम् । (तत्तु सप्तभूमिगृहम् । यथा, रामायणे । १ । ५ । १६ ।

"सर्व्वरत्नसमाकीर्णां विमानगृहशोभिताम् ॥"
"विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ॥"
इति तट्टीकाधृतनिघण्टुः ॥ )

घोटकः । यानमात्रम् । इति मेदिनी । ने, १३२ ॥ ( त्रि, परिच्छेदकम् । यथा, ऋग्वेदे । २ । ४० । ३ ।

"सोमापूषणा रजसो विमानं
सप्तचक्रं रथमविश्वमिन्वम् ॥"

"विमानं परिच्छेदकं सर्व्वमानमित्यर्थः ।" इति तद्भाष्ये सायणः ॥ साधनम् । यथा, तत्रैव । ३ । ३ । ४ ।

"पिता यज्ञानामसुरो विपश्चितां
विमानमग्निर्वयुनञ्च वाघताम् ॥" )

"विमानं विमीयतेऽनेन फलमिति विमानं यज्ञादिकर्म्मसाधनम् ।" इति तद्भाष्ये सायणः ॥ विगतो मानो यस्येति विग्रहे । अवज्ञातः । यथा, भागवते । ५ । १२ । १० ।

"क्वचित् सचित् क्षुद्ररसान् विचिन्वं-
स्तन्मक्षिकाभिर्व्यथितो विमानः ।
तत्राति कृच्छ्रं प्रति लब्धमानो
बलाद्विलुम्पन्त्यथ तांस्ततोऽन्ये ॥")

विमार्गः, पुं, विपूर्ब्बमृजधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ सम्मार्ज्जनी । ( विरुद्धो मार्गः । ) कुपथः । ( यथा, शाकुन्तले ५ अङ्के ।

"नियमयसि विमार्गप्रस्थितानात्तदण्डः
प्रशमयसि विवादं कल्पसे रक्षणाय ॥" )

विमुक्तः, त्रि, (वि+मुच्+क्तः ।) विशेषेण मुक्तः । यथा,—

"येऽन्येऽरविन्दाक्ष विमुक्तमानिन-
स्त्वय्यस्तभावादविशुद्धबुद्धयः ।
आरुह्य कृच्छ्रेण परं पदं ततः
पतन्त्यधो नादृतयुष्मदङ्घ्रयः ॥"
इति श्रीभागवते १० स्कन्धे १४ अध्यायः ॥

त्यक्तः । (यथा, महाभारते । ७ । २८ । ३५ ।

"विमुक्तं परमास्त्रेण जहि पार्थ महासुरम् ।
वैरिणं युधि दुर्द्धर्षं भगदत्तं सुरद्विषम् ॥"

पुं, माधवी । तत्पर्य्यायो यथा,—

"माधवी स्यात्तु वासन्ती पुण्ड्रको मण्डकोऽपि च ।
अतिमुक्तो विमुक्तश्च कामुको भ्रमरोत्सवः ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे ॥ )

विमुक्तिः, स्त्री, (वि+मुच्+क्तिन् ।) विमोचनम् । मोक्षः । यथा, प्रायश्चित्ततत्त्वे ।

"पितृन्नमस्ये दिवि ये च मूर्त्ताः
स्वधाभुजः काम्यफलाभिसन्धौ ।
प्रदानशक्ताः सकलेप्सितानां
विमुक्तिदा येऽनभिसंहितेषु ॥"

विमुखः, त्रि, ( विरुद्धं अननुकूलं मुखं यस्य । ) बहिर्मुखः । विरतः । यथा,—

"आगमैः कल्पितैस्त्वं हि जनान् मद्विमुखान्
कुरु ।
माञ्च गोपय येन स्यात् सृष्टिरेषोत्तरोत्तरा ॥"
इति पाद्मोत्तरखण्डे शिवं प्रति विष्णुवाक्यम् ॥

विमुदः, त्रि, ( विगता मुदा मुदभावो यस्य । ) प्रफुल्लः । इति हेमचन्द्रः ॥ मुदारहितश्च ॥

विमोक्षणं, क्ली, ( वि+मोक्ष+ल्युट् । ) विमोचनम् । परित्यजनम् । यथा,—

"यं धर्म्मकामार्थविमुक्तिकामा
भजन्त इष्टां गतिमाप्नुवन्ति ।
किञ्चाशिषो रात्यपि देहमव्ययं
करोतु मेऽदभ्रदयो विमोक्षणम् ॥"
इति श्रीभागवते १०।८३ अध्यायः ॥

विमोचनं, क्ली, (वि+मुच्+ल्युट् ।) दूरीकरणम् । विमुक्तिः । विपूर्ब्बमुचधातोरनट्प्रत्ययेन निष्पन्नम् ॥ ( यथा, महाभारते । १ । १६० । १३ ।

"अथवाहं करिष्यामि कुलस्यास्य विमोचनम् ।
फलसंस्था भविष्यामि कृत्वा कर्म्म सुदुष्करम् ॥"